Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७३
ओक्टोबर - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### अश्वस्य पुनर्जन्म

कालिदासस्य 'कुमारसम्भवम्' महाकाव्ये पार्वतीपरमेश्वरयोः विवाहवर्णनं वर्तते । अत्र तयोः नवदम्पत्योः प्रवासवर्णनम् अपि सुचारु करोति महाकविः । वृषभम् आरूढः शिवः पार्वतीम् अङ्के संस्थाप्य नानाप्रदेशेषु सञ्चरति । विवाहात् अनन्तरं युगलस्य एवंविधं प्रवसनं, वयं यावत् मन्यामहे तावत् नूतनं नास्ति ।

पृथ्वीराजः प्रियायाः संयुक्तायाः हरणं कृतवान् । तदानीं कश्चित् प्राणवान् अश्वः तस्य साहाय्यं कृतवान् । परन्तु विवाहात् अनन्तरं पृथ्वीराजः तम् अश्वम् आरुह्य प्रियया सह कुत्रचित् अटितुं गतः इति श्रवणपथं न आगतम् । अद्य सः एव अश्वः चक्रपादरूपेण (स्कूटर) उपस्थितः अस्ति । अद्यतनः चक्रपादः दाम्पत्यं रमणीयं करोति । कुटुम्बे बहवः सम्बन्धिनः वर्तन्ते । तत्र एकः प्रियकरः चक्रपादः अपि भवतु । द्विचक्राणां यानानां कार्यम् एतावत् विस्मयजनकं भविष्यति इति चक्रस्य आदिनिर्माता नैव जानीयात् । राज्ञी लक्ष्मीबाई अश्वे शोभते । यतः सा घटना सामान्या न । चक्रपादं चालयन्तीम् अद्यतनीं नारीं दृष्ट्वा वयं विस्मयं न गच्छामः । एषा घटना अपि विलक्षणा एव ननु ।

निदाघे सूर्यस्य आतपः निश्चयेन बाधते तथापि तस्य सायङ्कालः मनसः सन्तोषाय भवति । तदानीं किमपि शून्यं हृदयं कस्यचित् सहृदयस्य प्रतीक्षां करोति । सः एव प्रगतः समाजः, यस्मिन् सहृदयस्य निन्दा न भवति । उद्याने वृक्षस्य छायायां क्रियमाणः निभृतः प्रेमालापः पवित्रः अस्ति । संयुक्तकुटुम्बात् किञ्चित् अपसृत्य चक्रपादं नातिदूरे स्थापयित्वा जलपूरिकाः स्वदमानं युगलं पवित्रम् अस्ति । बहिः गते युगले श्वसुरौ अपि एकान्तं लभेते । तयोः स एकान्तः अपि पवित्रः अस्ति । वस्तुतः यानं बहूनां जनानां सायङ्कालं रमणीयं करोति ।

तनुचक्रिकया अपि बहूनि युगलानि मार्गे प्रवसन्ति । तनुचक्रिकायाः उपकाराः अनन्ताः, परन्तु तस्याः गतिमर्यादां धीरः एव सोढुं शक्नोति । चक्रपादस्य अपि मर्यादाम् असहमानाः युवकाः चक्राश्वं रोचयन्ति । गतिः खलु रोमाञ्चं जनयति । युवकं च साहसाय प्रेरयति । प्रायः युवकानां साहसे युवतीनां किमपि अगोचरं बलं भवति । पृष्ठे देहं संश्लिष्य उपविष्टायाः कस्याश्चित् रमण्याः 'किञ्चित् शनैः चालय !' इति मन्दोक्तिः युवकं पराक्रमाय प्रेरयति । प्राचीने काले अश्वः पौरुषस्य प्रतीकम् आसीत् । तत् अद्य चक्राश्वरूपेण प्रतिष्ठते । चक्राश्वः अर्थात् अश्वस्य पुनर्जन्म । क्वचित् सम्पूर्णं कुटुम्बं चक्राश्वम् आरुह्य यथेष्टं प्रवसति । 'कुटुम्बनियोजनं' प्रवासस्य शोभां वर्धयति । भोजनं, वस्त्रं, गृहम् इति त्रिकं मानवजीवनस्य प्राथमिकी आवश्यकता उच्यते । अत्र एकं यानम् अपि भवतु । गृहे विद्यमानं यानं दम्पत्योः कलहं निवारयितुं न शक्नोति, तथापि हृदयोः अन्तरं किञ्चित् न्यूनीकर्तुं शक्नोति । यानं केवलं स्थानपरिवर्तकं यन्त्रं नास्ति, अपि तु प्रेमतत्त्वपोषिका काचित् कौटुम्बिकी उत्क्रान्तिः अस्ति । यानाय हितम् । हितयोगे चतुर्थी (सम्प्रदानम्) इति वैयाकरणाः !

चक्रपादः – scooter, तनुचक्रिका – bicycle, चक्राश्वः – bike

# भगवतः अपि मानवः श्रेष्ठः



रत्नाकरनामकं देशं मणिकण्ठः नाम राजा पालयति स्म। तस्य बुद्धिमत्तया तदीयं राज्यं बहुधा विस्तृतम् अभवत्। बृहत् राज्यम् इति कारणात् देशस्य सर्वेषु भागेषु जनानां सुखदुःखविचारणं कष्टसाध्यं जातम्। अस्याः समस्यायाः परिहारं प्राप्तुं राजा मन्त्रिमण्डलेन सह मन्त्रालोचनं कृतवान्। मन्त्रिणः असूचयन् यत् देशं चतुर्धा विभज्य एकैकस्य भागस्य एकैकः प्रतिनिधिः नियोजनीयः इति। राजा एतां सूचनां सहर्षम् अङ्गीकृतवान्।

ततः राज्ञा चत्वारः राजप्रतिनिधयः नियुक्ताः। प्रतिमासं स्वस्य विभागे स्थितानां जनानां समस्यां, तदर्थं कृतान् परिहारान् च राजप्रतिनिधयः राजानं निवेदयेयुः इति नियमः कृतः। राजप्रतिनिधयः तथैव कुर्वन्ति स्म अपि।

प्रतिनिधयः सर्वेऽपि राज्ञः विषये यद्यपि श्रद्धायुक्ताः, भक्तियुक्ताः च आसन्, तथापि कासाञ्चन समस्यानाम् उद्भवस्य ते एव कारणीभूताः अपि अभवन्। यतः प्रतिनिधिषु कश्चन स्पर्धामनोभावः उद्भूतः। अन्येषां त्रयाणाम् अपेक्षया मम विभागः एव अधिकसमृद्धियुक्तः भवेत् इति भावना सर्वेषु प्रतिनिधिषु आसीत्। तदर्थं जनेषु उत्साहं वर्धयितुं ते प्रयत्नं कृतवन्तः।

अनेन परिस्थितिः विभिन्ना जाता। एकस्मिन् भागे यानि फलानि वर्धन्ते स्म तानि अन्यं भागं प्रति न प्रेष्यन्ते स्म। राज्यस्य उत्तरभागे कार्पासवर्धनम् अधिकम्। किन्तु तन्तुवायानाम् आधिक्यं दक्षिणभागे आसीत्। यदा राज्यं समग्रम् एकमेव इति भावना जागर्ति स्म तदा कार्पासम् उत्तरभागतः स्वीकृत्य दक्षिणभागस्य जनाः वयन्ति स्म। किन्तु उत्तरभागस्य राजप्रतिनिधिः कार्पासप्रेषणं यदा स्थगितवान्, मम विभागे वसन्तः जनाः एव वयनाभ्यासं कुर्वन्तु इति यदा अनुरोधं कृतवान्, तदा दक्षिणभागस्य प्रतिनिधिः जनान् सूचितवान् यत् भवन्तः अपि कार्पासमेव वर्धयन्तु इति। अस्य परिणामतः, यत्र समर्थाः तन्तुवायाः सन्ति तत्र उत्तमः कार्पासः न प्राप्तः, यत्र उत्तमः कार्पासः अस्ति तत्र योग्याः तन्तुवायाः न प्राप्ताः। अनेन वस्त्राणां स्तरः कुण्ठितः अभवत्।

एवमेव परिस्थितिः लोहानां विषयेऽपि उत्पन्ना। देशस्य पूर्वभागे उत्तमानां लोहानां खनयः आसन्। किन्तु पश्चिमभागे परिणताः लोहकाराः आसन्। पूर्वभागस्य राजप्रतिनिधिः पश्चिमभागं प्रति लोहानां प्रेषणं स्थगितवान्, स्वस्य प्रदेशे लोहवस्तुनिर्माणप्रशिक्षणं प्राप्तुं व्यवस्थां कृतवान् च। अस्य परिणामः पश्चिमभागेऽपि जातः। लोहानां क्रयणं करणीयम् आपतितं तत्रत्यैः जनैः।

राजप्रतिनिधिभिः प्रतिमासं स्वग्रामस्य परिस्थितेः विवरणं राज्ञे दीयते स्म। तत् विवरणं सूचयति स्म यत् प्रतिनिधयः यथाशक्ति राष्ट्रोन्नतिं कुर्वन्तः सन्ति इति। किन्तु मनस्तु एतत् अङ्गीकर्तुं न सिद्धम्। किन्तु कुत्र दोषः अस्ति इति तु राज्ञा न ज्ञातम्। पञ्च वर्षाणि अतीतानि। किन्तु देशे उन्नतेः लेशः अपि न दृष्टः।

अस्य कारणं ज्ञातुं राज्ञा राजधान्याम् अनेकाः गोष्ठ्यः आयोजिताः । एकस्यां गोष्ठ्यां वाणिजः भाषणं कुर्वन्तः उक्तवन्तः – ''पञ्चसु वर्षेषु वाणिज्यं बहुधा विस्तृतम्'' इति । तथैव उद्योगपतयः अपि उक्तवन्तः यत् उद्योगावकाशाः पूर्वपेक्षया अधिकाः सन्ति इति । एवं सर्वेषां भाषणं श्रुत्वा राज्ञः मनसि चिन्तनम् आगतम् – 'एतेषां वचनेन सन्तोषम् अनुभवानि, उत राज्ये उन्नतिः न दृष्टा इति चिन्तयानि' इति।

अतः राज्ञा कदाचित् पण्डितानां गोष्ठी आयोजिता । तस्यां गोष्ठ्यां शशिभूषणनामकः कश्चन पण्डितः स्वस्य पाण्डित्यं प्रदर्श्य राज्ञः सत्कारं प्राप्तवान्।

सत्कारं कृतवान् राजा शशिभूषणं पृष्टवान् – ''महोदय ! अहं भवतः पाण्डित्यसम्बन्धिप्रश्नान् न पृच्छामि। किन्तु बहुभ्यः दिनेभ्यः काचन समस्या मां बाधते। तस्याः समाधानं भवता वक्तुं शक्यते किम् ?'' इति।

''पृच्छतु महाराज ! योग्यतानुगुणम् उत्तरं दातुं प्रयतिष्ये'' इति उक्तवान् शशिभूषणः।

''अस्य जगतः सृष्टिकर्ता परमेश्वरः । अतः एव वयं सर्वे तमेव महामहिमान्वितं भावयामः । किन्तु परमेश्वरापेक्षया कोऽपि अधिकमहिमान्वितः अस्ति किम् ?'' इति राज्ञा पृष्टम् । ''महाराज ! भगवतः अपेक्षया अधिकमहिम्ना युक्तः मानवः एव'' इति झटिति उत्तरं दत्तवान् शशिभूषणः। तदा राजा आश्चर्यचकितः सन् उक्तवान् – ''एतेन उत्तरेण भवतः दायित्वं समाप्तं न भविष्यति। तत् कथमिति साधनीयम्'' इति।

शशिभूषणः सविनयम् उक्तवान् – ''मया एवं यत् उक्तं तस्य कारणं मम अनुभवः एव। महाराज ! मम ललाटे परमेश्वरः पण्डितत्वं लिखितवान् । तदनुगुणम् अहं पण्डितो भूत्वा उत्तरभागे शिक्षकस्थाने नियुक्तः सन् पाठयन् आसम्। किन्तु मम जन्मस्थानम् पूर्वभागे अस्ति इति कारणात् तस्मात् उद्योगात् अहं च्यवितः । अतः मया यस्यां विद्यायां पाण्डित्यं प्राप्तं तस्यां पाठनात् विमुखता प्राप्ता । इदानीं कृषिं कुर्वन् अहं मम उपजीविकां निर्वहन् अस्मि । भगवता मम ललाटे यत् लिखितं तत् मानवेन बलात् परिमृष्टम्। अतः इदानीं भवता एव ज्ञातं स्यात् यत् उभयोः मध्ये कः श्रेष्ठः'' इति।

शशिभूषणस्य वचनेन राज्ञः ज्ञानोदयः अभवत्। यत् राज्यं ऐक्यरूपेण आसीत् तत् चतुर्धा विभक्तम् इत्यतः एव एतत्सर्वं प्रवर्तमानम् अस्ति इति निर्णीतं तेन। सः पुनः मन्त्रिपरिषदम् आयोजितवान्। प्रमुखैः सह चर्चा अपि कृता।

मन्त्रिणः अस्मिन् विषये गभीरं विचिन्त्य उक्तवन्तः – ''महाराज ! बृहत् राज्यं कार्यकरणार्थं यत् चतुर्धा विभक्तं तत्र कोऽपि दोषः नास्ति। किन्तु प्रत्येकताभावना जनेषु या उत्पन्ना अत्र कारणीभूताः सन्ति राजप्रतिनिधयः एव। यदि प्रतिनिधिः अन्यप्रदेशस्य अभविष्यत् तर्हि एषा स्थितिः न अभविष्यत् एव। अतः प्रतिनिधीनां स्थानानि अवश्यं परिवर्तनीयानि । तदा विभागेषु स्थिता स्पर्धा दूरीभविष्यति । जनानां मध्ये परस्परं सहायभावना अपि उत्पत्स्यते'' इति।

राज्ञा मन्त्रिणां सूचनानुगुणं देशे परिवर्तनम् आनीतम्। तेन देशस्य उन्नतिः साध्या अभवत्।

कार्पासः – cotton, तन्तुवायः – weaver, खनिः – mine

## हिमालयो नाम नगाधिराजः

डॉ. सुखेश्वरः झा

इयं पङ्क्तिः महाकवेः कालिदासस्य कुमारसम्भवस्य वर्तते। समग्रं पद्यम् अधोलिखितमस्ति –

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥ इति**

वस्तुतः हिमालयः नगानां श्रेष्ठः विद्यते। साधूक्तं कविकुलगुरुणा सूक्ष्मनिरीक्षकेण यत् इयं पर्वतश्रेणी पूर्वसमुद्रम् एकतोऽपरतश्च पश्चिमसमुद्रम् अवगाह्य तथा तिष्ठति यथा पृथिव्याः मापनं कुर्वाणः मापदण्ड एव भवेत्।

उच्चैस्त्वेऽस्य कोऽप्यन्यः पर्वतः सदृशो नास्ति। 'एवरेस्ट' नामकम् अस्य गिरेः सानु संसारे उच्चैस्तमम्। अतः उच्चैस्त्वे विशालतायाञ्च अस्याचलस्य तुलना न विद्यते। 'नगाधिराज'– शब्दस्य अस्य कृते कृतो महाकवेः प्रयोगः सर्वथा औचित्यं बिभर्त्ति।

अस्य पर्वतस्य भारतभुवि विविधदृष्ट्या प्रभूतं महत्त्वं को वा न स्वीचर्क्रियात्? भारतीयः समाजः अज्ञात–कालात् शिवं महादेवं कथयति। तस्य पत्नी महादेवी पार्वती अस्यैव पर्वतराजस्य पुत्री मन्यते इति पौराणिकी स्थितिः। तया सह शिवः यस्मिन् कैलासाभिधे पर्वते निवसति सः हिमालयावयव एव। अतः धार्मिक–भावनामाधृत्य भारतीयैः अस्य पर्वतराजस्य अविच्छेद्यो दृढ; सम्बन्धः।

सम्पूर्णे भारतोपमहाद्वीपे भौगोलिकदृष्ट्या परिस्थितिरेव अन्यादृशी अनभीष्टा स्यात् यदि हिमालय–पर्वत–श्रेणी उत्तरस्यां न स्यात्! 'मौनसून' नामकस्य जलदवायोः दक्षिणसमुद्राद् उत्तरां दिशं गच्छतः तत्र अवरोधात् परावर्तनं भवति इति वर्षा समस्ते देशे भवति। अन्यथा समग्रा भारतभूः मरुप्राया अभविष्यत्।

अस्या एव पर्वतश्रेण्याः सा स्रोतस्वती निःसरति या 'गङ्गे' त्यभिधीयते। गङ्गा सा नदी यया सह संसारे कस्याः अपि नद्याः अन्यस्याः साम्यं दर्शयितुमशक्यम्। एतस्याः एव संसारे एकलायाः नद्याः तादृशं जलं यत् दिनेषु सप्ताहेषु, मासेषु, किन्नाम वर्षेषु युगेषु अपि कुत्रापि काचपात्रादौ रक्षितं वैगुण्यं न गच्छति। सेयं गङ्गा जगत्–पावनी नगाधिराजात् एव अक्षय्यं स्रोतः – कदाप्यशुष्कं मूलम् – प्राप्नोति। अस्याः नद्याः अमृतजलेन सिञ्चिता भारतभूः सम्पूर्णे वर्षे विविधानि सस्यानि ऋतुफलानि च प्रसूतेतमाम्। किन्तु तटस्थैः महानगरैः अस्याः जलस्य दूषणम् अद्य चिन्तायाः विषयः!

सेयं गङ्गा अपि शिवजटाजूटवासिनी पार्वती सपत्नी शङ्करप्रियेति पौराणिकी वार्ता।

अस्याः नद्याः अपिहेतोः हिमालयेन भारतीयानाम् अनिर्वाच्यो भावनात्मकः सम्बन्धः।

सोऽयं पर्वतराजः अद्यापि पूर्णसुरक्षको नोचेत् कस्यापि आचिक्रमिषोः शत्रोः उत्साहभञ्जकः– अत्यायासकारी तु वर्तत एव। हिमान्याः हेतोः समग्रे एव वर्षे तुषारस्रवणात् सम्बद्धायां नद्यां जलपरिमाणं रक्षितं तिष्ठति। हिमालयपर्वतश्रेणीषु वनराजयः सन्ति, यतः विविधानि काष्ठानि, तृणानि, औषधानि रत्नादीनि च लभ्यन्ते। वन्या बहवः पशवश्च प्राप्यन्ते।

धन्योऽयं महाकायः तपस्यायै चिराद् ऋषिजनसमाश्रितो विविधदृष्ट्या सुदृढ–सम्बद्धो नगाधिराजः। अस्यावस्थित्या इयं भारतभूमिः धन्या, धन्याश्च भारतभूम्यधिवासिनः।

## मासवार्ता

**सम्पन्नः 'Diploma in Sanskrit Teaching' अभ्यासक्रमः ।**





संस्कृतमाध्यमेन संस्कृतं पाठयितुम् इच्छुकानां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमीसंस्थानेन 'Diploma in Sanskrit Teaching' इति अभ्यासक्रमः सञ्चाल्यते। अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह सलङ्गनः वर्तते । सप्टेम्बरमासस्य २५ दिनाङ्के अभ्यासक्रमोऽयं सम्पन्नः । एतस्मिन् कष्टकाले यदा विद्यासंस्थानानि स्थगितानि सन्ति तदा एकलव्य-संस्कृत-एकेडेमीसंस्थानेन छात्रेभ्यः online प्रशिक्षणं कल्पितम् आसीत् । प्रशिक्षणकाले online कथं पाठयितुं शक्यते इत्येतं विषयमपि छात्राः अपठन् । अस्य अभ्यासक्रमस्य परीक्षा २९ दिनाङ्के सम्पन्ना।

## संस्कृत-गरबा

**शिरसि सौवर्णो दीपघटः**

(रागः- सोनानो गरबो शिरे अम्बे मा...)

शिरसि सौवर्णो दीपघटो जगदम्ब
चालय मन्दं मन्दं रे...
भावविलासै रासे रममाणा
दक्षिणदेशीयवसनानि... जगदम्ब
षोडशाभणैः शोभा विवर्धते
मौक्तिक्हीरककाञ्चनैः... जगदम्ब
सखीभिः सार्धं मण्डले चलन्ती
परितस्त्वरिता भ्रमन्ती... जगदम्ब
अष्टसुगन्धो वायुः प्रवाति
पाटलजलेन सुवासितो... जगदम्ब
वंशीवीणे पूरयतः सुस्वरं
मृदङ्गो मन्दं मन्दं... जगदम्ब
माईकलापी ध्यायन्जगदम्बां
भक्त्या सजले नयने... जगदम्ब

**श्री रामप्रसादः दवे**

**रासेश्वरि रे रासेश्वरि !**

(रागः- हां हां रे घडुलियो चढावरे)

हां हां रे, रासार्थम् आगच्चरे रासेश्वरि !
रासेश्वरि रे रसेश्वरि !
हां हां रे, रासार्थम् आगच्छ रे रासेश्वरि !...
रासलीला लीलार्थम् आयोजितारे रागेश्वरि !
मुदा मोहकश्च मेलिष्यति मोहने रे मङ्गलेश्वरि !
हां हां रे... ॥
शीताशीता सुरम्या रजनी, सौम्ये सर्वेश्वरि !
त्वं मङ्गलकारिण्यसि सर्वथा मातर् महेश्वरि !
हां हां रे... ॥
त्वां गायत्री गौरी चामुण्डा रे राजराजेश्वरि !
त्वं सीता सावित्री सर्वदैव रे दिव्येश्वरि !
हां हां रे... ॥
त्वं गर्भ-दीपनृत्ये र राज रे, मातर् गौरि !
भद्रभावैर्भविष्यति भद्रं रे, भद्रेश्वरि !
हां हां रे... ॥

**डॉ. वासुदेवः वि. पाठकः 'वागर्थः'**

## कृपया हसन्तु

"कार्यालयात् आगमनसमये पुत्रं शालातः स्वीकृत्य आगच्छतु" इति रमा पतिम् अवदत् । दूरभाषेण वार्तालापे व्यस्तः पतिः शालां गत्वा बालं स्वीकृत्य याने उपाविश्य गृहं प्रति प्रस्थानम् अकरोत् । आगमनसमये पिता दूरभाषेण वार्तालापे व्यस्तः आसीत् । मार्गे किमपि वक्तुकामः बालः वारं वारं आक्रोशम् अकरोत् । किन्तु वार्तालापे दत्तचित्तः पिता किमपि न अशृणोत् ।

गृहम् आगत्य पतिः पत्नीम् अवदत् - "बालं पश्य । कदाचित् तस्य स्वास्थ्यं सम्यक् नास्ति । मार्गे अक्रोशं कुर्वन् आसीत् ।"

पत्नी दृष्ट्वा - "भोः एषः आवयोः पुत्रः नास्ति । भवान् अन्यं बालम् आनीतवान् । कदाचित् एषः तदेव वक्तुम् ऐच्छत् ।"

★ ★ ★ ★ ★

**रमणः - (नमनम् उद्दिश्य) - दोषान्वेषकयन्त्रस्य विषये त्वं किं जानासि ?**

**नमनः - बहुविधं जानामि ।**

**रमणः - कथम् ?**

**नमनः - एकेन सह मम विवाहः जातः अस्ति ।**

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**प्रायेण नीचलोकस्य कः करोतीह गर्वताम् ।**
**आदौ वर्णद्वयं दत्त्वा ब्रूहि के वनवासिनः ॥**

निकृष्टजनानां मनसि कस्मात् वस्तुनः अहङ्कारः उत्पद्यते ? तस्य आदौ वर्णद्वयं यदि योज्यते तर्हि 'वनवासिनः' इत्येषः अर्थ भवेत्। किं तत् ? राः – धनम्। श, ब, इत्येतत् अक्षरद्वयं योजनीयम्।

**उत्तरम्** – शबराः

**यः एवादिः स एवान्तो मध्ये भवति मध्यमः ।**
**यः एतन्नाभिजानीयात् तृणमात्रं न वेत्ति सः ॥**

आदौ यकारः, अन्ते सकारः विद्यते। मध्ये ग्रन्थिः विद्यते। इदं यः न जानीयात् स तृणमात्रमपि न जानाति। 'तृणम्' इत्यस्य पर्यायपदमेव अस्य उत्तरं भवति।

**उत्तरम्** – यवसम्

**यजमानेन कः स्वर्गहेतुः सम्यग्विधीयते ।**
**विहायाद्यन्तयोर्वर्णौ गोत्वं कुत्र स्थितं वद ॥**

स्वर्गं यत् प्रापयति तादृशं किं कार्यं मनुष्यः करोति ? तस्मिन् शब्दे प्रथमम् अन्तिमं च अक्षरं यदि निष्कासयेम तर्हि गोत्वं (धेनोः गुणधर्माः) कुत्र विद्यते ? इत्येतस्य उत्तरं प्राप्येत।

**उत्तरम्** – यागविधिः

## ज्ञानसरिता

श्याम: पटेल:

**कण्टकयुक्त: कृकलास: ( सरट: ) "थोर्नी डेविल"**



शरीरस्य वर्णपरिवर्तने कुशल: कृकलास: "सरट:" अपि कथ्यते । तेषु बहव: जातिभेदा: भवन्ति । तेषाम् ओस्ट्रेलिया देशस्य "थोर्नी डेविल" संज्ञ: सरट: तु अन्यतम: । प्रत्युत ओस्ट्रेलियादेश: स्वकीयानां विभिन्नप्राणिनां कृते कीर्तित: वर्तते । अयं सरट: ओस्ट्रेलियादेशस्य मरुभूमौ दृश्यते । तनुना लघु: एष: भयङ्कर: भीमसरट: इव भासते । यत: तस्य त्वक् कण्टकयुक्ता भवति । एष: सरट: सपृच्छं २० सेन्टीमीटर परिमित: दीर्घ: भवति । यद्यपि मरुभूमे: वालुकाया: य: वर्ण: भवति स एव वर्ण: अस्य कृकलासस्यापि भवति तथापि एष: आवश्यकतानुसारं स्ववर्णं परिवर्तितुम् अर्हति ।

"थोर्नी डेविल" सरटस्य पृष्ठे अपरं मस्तकम् इव दृश्यमान: एक: बृहत् चर्मग्रन्थि: भवति । वस्तुतस्तु अयं चर्मग्रन्थि: आखेटिकप्राणिभ्य: स्वरक्षार्थं भवति । यदा कोऽपि आखेटिक: जन्तु: तस्योपरि आक्रमणं करोति तदा "थोर्नी डेविल" सरट: स्वीयं मस्तकम् अग्रिमयो: पादयो: मध्ये प्रच्छन्नीकरोति । चर्मग्रन्थिं मुखं मत्वा आक्रमणं कुर्वन् स: आखेटक: जन्तु: एतस्य कण्टकै: विदीर्ण: भवति । अनेन सरट: आत्मरक्षां करोति ।

"थोर्नी डेविल" सरट: पिपीलिकादीनां भोजनं करोति । तस्य जिह्वा दीर्घा भवति । तथा वर्णपरिवर्तनं विहाय एष: सरट: शरीरे वायुं पूरयित्वा स्वकीयाम् आकृतिम् अपि वर्धयति ।

सरट: – chameleon

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **स्वर्णम्** | सोना | gold |
| **स्वातन्त्र्यम्** | आज़ादी | freedom |
| **स्वाद:** | जायका | taste |
| **स्वादु:** | अच्छे स्वाद वाला | having good taste |
| **स्वाप:** | सोना | sleep |
| **स्वीय** | अपना | own |
| **हट्ट:** | बाज़ार | market |
| **हनु** | ठोढी | the chin |
| **हरिण:** | मृग | a deer |
| **हरिद्रा** | हल्दी | turmeric |
| **हर्ष:** | आनन्द | joy |
| **हाटकम्** | सोना | gold |
| **हायनम्** | वर्ष | year |
| **हारक:** | चोर | a thief |
| **हाला** | मदिरा | wine |

## किं भवन्त: जानन्ति ?

**१ ) शुक्रनीते: रचयिता क: वर्तते ?**

(क) शङ्कराचार्य: (ख) उदयनाचार्य: (ग) शुक्राचार्य: (घ) भास्कराचार्य:

**२ ) 'अभिषेक' नामकं नाटकं केन रचितं वर्तते ?**

(क) भासेन (ख) भवभूतिना (ग) श्रीहर्षेण (घ) जयदेवेन

**३ ) 'कृत्तवासरामायणम्' कस्यां भाषायां रचितमस्ति ?**

(क) गुजराती (ख) उडिया (ग) तमिल (घ) बँगला

**४ ) गीतारहस्यग्रन्थस्य कर्ता क: अस्ति ?**

(क) लाजपतराय: (ख) परमानन्द: (ग) बालगङ्गाधर: तिलक: (घ) गोपालकृष्ण:

**५ ) योगशास्त्रस्य रचयिता क: वर्तते ?**

(क) पाणिनि: (ख) शङ्कराचार्य: (ग) कणाद: (घ) पतञ्जलि:

**६ ) साङ्ख्यशास्त्रस्य कर्ता क: वर्तते ?**

(क) पाणिनि: (ख) आचार्य: कपिल: (ग) पतञ्जलि: (घ) कणाद:

**७ ) पुराणानां कर्ता क: अस्ति ?**

(क) वाल्मिकि: (ख) विश्वामित्र: (ग) वेदव्यास: (घ) याज्ञवल्क्य:

उत्तराणि – (१) ग (२) ख (३) घ (४) ग (५) घ (६) ख (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

Value Education Through Sanskrit in

## बालसंस्कारकेन्द्रम्
(Class 4 to 6)

## बालसंस्कृतकेन्द्रम्
(Class 7 & 8)

**Date :** 21/11/20 to 10/04/21
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 3000/-

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકીર્દિ બનાવવા માંગો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજીત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં

ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.
- પ્રવેશની અંતિમ તારીખ ૮/૧૦/૨૦૨૦

અભ્યાસક્રમની વિશેષતાઃ

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | – 100 |
| द्वैवार्षिकं | रू | – 175 |
| त्रैवार्षिकं | रू | – 250 |
| अङ्कमूल्यं | रू | – 10 |

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006